# 20

# सत्याग्रहाश्रमः

आप महात्मा गाँधी के व्यक्तित्व से परिचित ही हैं। अंग्रेजों की दासता व अन्याय से देश को मुक्त कराने में जहाँ उनके सत्याग्रह की भूमिका प्रशंसनीय थी, वहीं उनका आचार-व्यवहार आज भी हमारे लिए अनुकरणीय है। आधुनिक युग में हम विज्ञान की उपलब्धियों से तो बहुत उत्साहित हैं– किन्तु हम सामाजिक जीवन में गाँधी जी के आदर्शों व सिद्धान्तों से दूर हटते जा रहे हैं। जो उचित नहीं है। प्रस्तुत पाठ आधुनिक कवयित्री पण्डिता क्षमाराव कृत 'सत्याग्रहगीता' के चतुर्थ अध्याय से उद्धृत है जिसमें उन्होंने साबरमती के सत्याग्रह आश्रम तथा महात्मा गाँधी के आदर्श आचरण व उनके चिन्तन का सुन्दर वर्णन किया है। हमें यह पाठ सत्य, अहिंसा तथा सदाचार को जीवन में अपनाने की प्रेरणा देता है, जिससे हम इस महान् देश के महान् नागरिक बन सकें।

## उद्देश्यानि

**इमं पाठं पठित्वा भवान्/भवती**

- सत्याग्रहाश्रमस्य विशेषतां वर्णयिष्यति;
- पाठगतश्लोकानाम् अन्वयं भावार्थं च लेखिष्यति;
- महात्मनः गान्धिनः चारित्रिकं वैशिष्ट्यं लेखिष्यति;
- दीर्घ-पूर्वरूप-विसर्गसन्धियुक्तपदानां सन्धिच्छेदं करिष्यति;
- 'शतृ' प्रत्ययस्य प्रयोगं करिष्यति;
- नदी, पितृ, गच्छत्, आत्मन् शब्दानां रूपाणां वाक्येषु प्रयोगं करिष्यति;
- पाठगतसमस्तपदानां विग्रहं विधास्यति।

## क्रियाकलापः 20.1

'क' स्तम्भ में दिये चित्रों के साथ 'ख' स्तम्भ में दिये उनसे सम्बन्धित कथनों, घटनाओं, विचारों, आदि का मिलान कीजिए और पृथक् से लिखिए।

| क | | ख |
|---|---|---|
| <br>चित्र 20.1 | | |
| अ. | लोकमान्य बालगंगाधर तिलकः | (i) लाहौरे रावीनद्याः तटे 26 जनवरी 1930 तिथौ पूर्णस्वाराज्यस्य प्राप्त्यै घोषणा। |
| <br>चित्र 20.2 | | |
| आ. | रानी लक्ष्मीबाई | (ii) मराठा-केसरीपत्रयोः सम्पादनम् कारागारे गीताभाष्यस्य लेखनम् |
| <br>चित्र 20.3 | | |
| इ | नेताजी सुभाषचन्द्रबोसः | (iii) 1857 ईसवीये वर्षे प्रथमस्वतंत्रतासंग्रामे आंग्लसैनिकैः सह युद्धम्- ग्वालियरक्षेत्रे। |



चित्र 20.4

ई पं. जवाहरलालनेहरुः (v) 'इंडियन नेशनल आर्मी' (भारतीय राष्ट्रीय सेना) इति संगठनम्, 'जय हिन्द' इति एकताध्वनिः।

## 20.1 इदानीं मूलपाठं पठामः

**प्रथमः एकांशः**

ततस्तीरे सबर्मत्या नाम्ना सत्याग्रहाश्रमः।
महात्मा स्थापयामास सदनं सानुयात्रिकः।।1।।

सत्यमेव प्रमाणं यन्मनोवाक्कायकर्मभिः।
तस्मिन् पुण्यनिवासे तद् यथार्थो हि स आश्रमः।।2।।

निर्ममो नित्यसत्त्वस्थो मिताशी सुस्मिताननः।
सुकलत्रः शिशुप्रेमी पितेवाश्रमवासिनाम्।।3।।

ध्यायन् क्लेशान् स्वबन्धूनां तद्धितैकपरायणः।
विराजते मुनिर्बुद्धो बोधिद्रुमतले यथा।।4।।

**द्वितीय : एकांशः**

बलं सर्वबलेभ्योऽपि सत्यमेवातिरिच्यते।
सत्यवानबलः श्रेयान् सबलात् सत्यवर्जितात्।।5।।

अत एव मया दत्तं नाम सत्याग्रहाश्रमः।
सत्यानुयायियुक्ताया विनीतवसतेर्मम।।6।।

**शब्दार्थाः**

सबर्मत्याः = साबरमती नदी के
स्थापयामास = स्थापित किया
सदनं = घर को, भवन को
सानुयात्रिकः = अपने अनुयायियों के साथ
मनोवाक्कायकर्मभिः = मन, वाणी शरीर और कर्म के द्वारा
यथार्थः = नाम के अनुसार अर्थवाला
निर्ममः = मोहरहित,
नित्यसत्त्वस्थः = सदा सत्त्वगुण से युक्त
मिताशी = कम भोजन करने वाला
सुस्मिताननः = प्रसन्न मुखवाले या सुंदर मुस्कराहट से युक्त
तद्धितैकपरायणः = उनकी भलाई में तत्पर, लगे हुए
बोधिद्रुमतले = बोधि वृक्ष (पीपल) के नीचे
अतिरिच्यते = सबसे बढ़कर है
अबलः = कमजोर, शक्तिरहित
श्रेयान् = अधिक कल्याणकारी
सत्यवर्जितात् = सत्य से रहित वाले से
सत्यानुयायियुक्तायाः = सत्य का अनुगमन करने वाली के
विनीतवसतेः = सज्जनों की बस्ती के
आमोघम् = कभी नष्ट न होने वाले

इति सत्यादिधर्माणाममोघं बलमद्भुतम्।
वर्णयन् ग्राहयामास व्रतानि सुबहून् गुरुः॥7॥

आत्मवत्सर्वभूतानि पश्यतोऽस्य पदानुगाः।
गुणैः परवशीभूता व्यवर्धन्त सहस्रशः॥8॥

## बोधप्रश्नाः

1. **मूलपाठं पठित्वा रिक्तस्थानपूर्तिं कुरुत।**

   (क) महात्मा ........................ सदनं सानुयात्रिकः।

   (ख) विराजते ........................ बोधिद्रुमतले यथा।

   (ग) सत्यवानबलः ........................ सबलात् सत्यवर्जितात्।

   (घ) गुणैः परवशीभूता ........................ सहस्रशः।

2. **स्तम्भद्वयोः वाक्यांशानाम् उचितमेलनं कुरुत।**

| अ | ब |
|---|---|
| (क) यथार्थो हि सः | (i) मम |
| (ख) विनीतवसतेः | (ii) श्रेयान् |
| (ग) आत्मवत् | (iii) आश्रमवासिनाम् |
| (घ) सत्यवानबलः | (iv) आश्रमः |
| (ङ) पितेव | (v) सर्वभूतानि |

3. **शब्दार्थमेलनं कुरुत।**

| शब्दाः | अर्थाः |
|---|---|
| (क) सदनम् | (i) कभी नष्ट न होने वाला |
| (ख) निर्ममः | (ii) बढ़ गए |
| (ग) मिताशी | (iii) मोह-रहित |
| (घ) अमोघम् | (iv) घर को, |
| (ङ) व्यवर्धन्त | (v) अल्पभोजी |

### टिप्पणी

ग्राहयामास = ग्रहण कराया
व्रतानि = सत्य-अहिंसा आदि व्रतों/नियमों को, सुबहून् = बहुतों को, गुरुः = महात्मा गाँधी, पश्यतः = देखते हुए के, पदानुगाः = पीछे चलने वाले, व्यवर्धन्त = बढ़ गए सहस्रशः = हजारों

टिप्पणी

## 20.2 अधुना पाठम् अवगच्छामः

### 20.2.1 प्रथमः एकांशः

*01 श्लोकतः ....... 04 पर्यन्तम्*

**श्लोकः 1**

ततस्तीरे सबर्मत्या नाम्ना सत्याग्रहाश्रमः।
महात्मा स्थापयामास सदनं सानुयात्रिकः।।1।।

**अन्वयः** तत् सानुयात्रिकः महात्मा सबर्मत्याः तीरे सत्याग्रहाश्रमः (इति) नाम्ना सदनम् स्थापयामास।

**व्याख्या** अँग्रेजों के अन्यायपूर्ण शासन के विरुद्ध सत्याग्रह करने के लिए महात्मा गाँधी ने अपने सच्चे देशभक्त अनुयायियों के साथ मिलकर अहमदाबाद के निकट साबरमती नदी के किनारे सत्याग्रह आश्रम की स्थापना की। उन्होंने इसी आश्रम से दाँडी तक की पैदल यात्रा करके तथा समुद्री जल से नमक बनाकर अँग्रेजी कानून के विरोध में 1930 में नमक सत्याग्रह आन्दोलन शुरू किया था।

**भावार्थः** महात्मा गाँधी आँग्लशासनस्य विरोधे सत्याग्रहं कर्तुम् उद्यतः अभवत्। एतदर्थं सः स्व-अनुयायिभिः सह सबर्मत्याः तटे सत्याग्रहाश्रमं स्थापितवान्।



चित्र 20.5: अहमदाबाद (गुजरात) में साबरनदी तट पर स्थित सत्याग्रह आश्रम

**श्लोकः 2**

सत्यमेव प्रमाणं यन्मनोवाक्कायकर्मभिः।
तस्मिन् पुण्यनिवासे तद् यथार्थो हि स आश्रमः।।2।।

**अन्वयः** तस्मिन् पुण्यनिवासे मनोवाक्कायकर्मभिः यत् सत्यम् तद् एव प्रमाणम् (इति) सः आश्रमः हि यथार्थः (जातः)।

**व्याख्या** साबरमती आश्रम ऐसा पवित्र निवास था जहाँ के लोग शरीर, मन, वाणी और कर्म से सत्य व्यवहार करते थे, इसीलिए, 'सत्याग्रहाश्रम' भी सत्य के प्रति आग्रह वाला होने से, वह 'यथा नाम तथा गुण' वाला प्रसिद्ध हुआ।

**भावार्थः** सबर्मत्याः आश्रमे महात्मनः गाँधिनः अनुयायिनः मनसा, वाचा, कायेन कर्मणा च सत्यमेव आचरन्ति स्म। व्यवहारेऽपि सत्यताकारणात् सः आश्रमः नामगुणानुरूपः प्रसिद्धः जातः।

**श्लोकः 3**

> निर्ममो नित्यसत्त्वस्थो मिताशी सुस्मिताननः।
> सुकलत्रः शिशुप्रेमी पितेवाश्रमवासिनाम्।।3।।

**अन्वयः** (महात्मा गाँधी) निर्ममः, नित्यसत्त्वस्थः, मिताशी, सुस्मिताननः, सुकलत्रः, शिशुप्रेमी (च आसीत्)। (सः) आश्रमवासिनाम् पिता इव (आसीत्)।

**व्याख्या** महात्मा गाँधी वास्तव में महान् आत्मा थे। वह सदा मोह-ममता से रहित, नित्य सत्त्वगुण से युक्त, थोड़ा भोजन करने वाले, सदा प्रसन्न मुख तथा व्यवहारकुशल थे। उनकी पत्नी सद्गुणों से युक्त थीं। वे शिशुओं को बहुत प्यार करते थे। वे आश्रमवासियों के लिए तो साक्षात् पिता के समान थे। सभी के साथ उनका समान स्नेहमय व्यवहार था।

**भावार्थः** महात्मनः वस्तुतः गाँधिनः आत्मा महान् आसीत्। सः सर्वेषु आश्रमवासिषु समानरूपेण स्निह्यति स्म। सः तु सत्त्वगुणयुक्तः अल्पभोजी, प्रसन्नः सद्भार्यया युक्तः शिशुस्नेही चासीत्। सः आश्रमवासिनां कृते पित्रा सदृशः आसीत्।

**श्लोकः 4**

> ध्यायन् क्लेशान् स्वबन्धूनां तद्धितैकपरायणः।
> विराजते मुनिर्बुद्धो बोधिद्रुमतले यथा।।4।।

**अन्वयः** स्वबन्धूनाम् क्लेशान् ध्यायन् तद्धितैकपरायणः मुनिः विराजते यथा बोधिद्रुमतले बुद्धः (व्यराजत)।

**व्याख्या** महात्मा गाँधी अपने अनुयायिओं के कष्टों का सदा ध्यान रखते थे। वह उनके हित का चिन्तन करते हुए आश्रम में मुनि के रूप में उसी प्रकार विराजमान थे जैसे बोधिवृक्ष पीपल के नीचे ध्यान लगाए महात्मा बुद्ध विराजमान हों। इनका आश्रमवासियों के साथ बहुत ही अपनापन था। वे देश की समस्त जनता के हित की बात ही सदा सोचते थे।

**भावार्थः** महात्मा गाँधी तु "आश्रमवासी कोऽपि किमपि कष्टं न अनुभवेत्" इति चिन्तयन् तेषां सर्वथा हिते तत्परः अभवत्। एवं हि सः आश्रमे बोधिवृक्षस्य अधः बुद्धः इव राजते स्म।

## व्याकरणबिन्दवः

### (क) सन्धिच्छेदाः

| | | | |
|---|---|---|---|
| (i) | ततस्तीरे | = | ततः + तीरे (विसर्गस्य सत्वम्) |
| (ii) | सबर्मत्या नाम्ना | = | सबर्मत्याः + नाम्ना (विसर्गलोपः) |
| (iii) | मुनिर्बुद्धः | = | मुनिः + बुद्धः (विसर्गस्य 'र्') |
| (iv) | सत्याग्रहाश्रमः | = | सत्याग्रह + आश्रमः (दीर्घसन्धिः) |
| (v) | यथार्थः | = | यथा + अर्थः (दीर्घसन्धिः) |
| (vi) | मिताशी | = | मित + आशी (दीर्घसन्धिः) |
| (vii) | सुस्मिताननः | = | सुस्मित + आननः (दीर्घसन्धिः) |
| (viii) | पितेवाश्रमवासिनाम् | = | पिता + इव + आश्रमवासिनाम् (गुण, दीर्घ) |
| (ix) | तद्धितैकपरायणः | = | तत् + हित + एकपरायणः (जश्त्वम् हस्य धत्वम्) |

### (ख) विग्रहः समासः च

| | | | |
|---|---|---|---|
| (i) | नित्यसत्त्वस्थः | नित्यं सत्त्वे स्थितः | तत्पुरुषः |
| (ii) | मिताशी | मितम् अश्नाति तच्छीलः | तत्पुरुषः |
| (iii) | सत्याग्रहाश्रमः | सत्याग्रहाय आश्रमः | (च. ततपुरुषः) |
| (iv) | शिशुप्रेमी | शिशूनां प्रेमी | (षष्ठी तत्पुरुषः) |
| (v) | बोधिद्रुमतले | बोधेः द्रुमः बोधिद्रुमः<br>बोधिद्रुमस्य तले | (षष्ठी तत्पुरुषः) |
| (vi) | महात्मा | महान् आत्मा यस्य सः | (बहुव्रीहिः) |
| (vii) | पुण्यनिवासे | पुण्यः निवासः तस्मिन् | (कर्मधारय) |
| (viii) | तद्धितैकपरायणः | तेषाम् हितम् तद्धितम्<br>तद्धिते एकपरायणः | (षष्ठी तत्पुरुषः)<br>(सप्तमी तत्पुरुषः) |
| (ix) | मनोवाक्कायकर्मभिः | मनः च वाक् च कायःच<br>कर्म च तैः | द्वन्द्वः |
| (x) | सानुयात्रिकः | अनुयात्रिकैः सह विद्यमानः | (बहुव्रीहिः) |

(xi) निर्ममः — 'मम' इति निर्गतं यस्मात् — (बहुव्रीहिः)

(xii) सुस्मिताननः — सुस्मितम् आननं यस्य सः — (बहुव्रीहिः)

(xiii) सुकलत्रः — शोभनं कलत्रं यस्य सः — (बहुव्रीहिः)

**(ग) पद-परिचयः**

(i) ततः = अव्ययम्

(ii) सबर्मत्या = सबर्मती, षष्ठी, एकवचनम्।

(iii) नाम्ना = नामन्, तृतीया, एकवचनम्।

(iv) महात्मा = महात्मन्, प्रथमा, एकवचनम्।

(v) तस्मिन् = तत् (सर्वनाम) पुं., सप्तमी, एकवचनम्।

(vi) पिता = पितृ शब्दः, प्रथमा; एकवचनम्।

(vii) आश्रमवासिनाम् = आश्रमवासिन्, पुं. षष्ठी, बहुवचनम्।

(viii) बन्धूनाम् = बन्धुशब्दः पुं. षष्ठी, बहुवचनम्।

(ix) क्लेशान् = क्लेशशब्दः, पुं. द्वितीया, बहुवचनम्।

(x) विराजते = क्रियापदम्-'वि' उपसर्गः राज्, धातुः, लट्, प्रथमपुरुषः, एकवचनम्

**प्रकृति-प्रत्यययोगः**

ध्यायन् = ध्यै धातुः + शतृ (प्रत्ययः)
पुं., प्रथमा एकवचनम्।

आश्रमवासिनाम् = आश्रमवास + णिनि = आश्रमवासिन्,
षष्ठी बहुवचनम्।

## पाठगतप्रश्नाः 20.1

1. **अधोलिखितान् प्रश्नान् संस्कृतेन उत्तरत।**

(क) सत्याग्रहाश्रमः कस्याः नद्याः तीरे अस्ति?



टिप्पणी

(ख) यथार्थः कः आसीत्?

(ग) आश्रमवासिनाम् कः पिता इव आसीत्?

(घ) बुद्धः कुत्र राजते स्म?

**2. विशेषण-विशेष्यमेलनं कुरुत।**

| क | ख | | |
|---|---|---|---|
| (क) तस्मिन् | (i) मुनिः | .............. | ............. |
| (ख) यथार्थः | (ii) पुण्यनिवासे | .............. | ............. |
| (ग) सानुयात्रिकः | (iii) आश्रमः | .............. | ............. |
| (घ) तद्धितैकपरायणः | (iv) महात्मा | .............. | ............. |

**3. विग्रहानुसारम् समस्तपदं रचयत।**

(क) महान् आत्मा यस्य सः ............................

(ख) शिशूनाम् प्रेमी ............................

(ग) शोभनम् कलत्रम् यस्य सः ............................

(घ) सत्याग्रहाय आश्रमः ............................

**4. सत्यम ( √ ) असत्यम् ( X ) वा इति चिह्नीकुरुत।**

(क) सत्याग्रहाश्रमः पुण्यनिवासः अस्ति।

(ख) बोधिद्रुमतले मुनिः विराजते।

(ग) आश्रमः यथार्थः असीत्।

(घ) आश्रमे मिताशी कोऽपि न आसीत्।

## 20.2.1 द्वितीयः एकांशः

***05 श्लोकतः ....... 08 पर्यन्तम्***

**श्लोकः 5**

बलं सर्वबलेभ्योऽपि सत्यमेवातिरिच्यते।
सत्यवानबलः श्रेयान् सबलात् सत्यवर्जितात्।।5।।

**अन्वयः** सर्वबलेश्यः अपि सत्यम् बलम् एव अतिरिच्यते। सत्यवर्जितात् सबलात् अबलः अपि सत्यवान् श्रेयान् (भवति)।

टिप्पणी

**व्याख्या** कवयित्री क्षमाराव 'सत्याग्रहाश्रम' की महत्ता बताते हुए कहती हैं कि जीवन में धनबल, शक्तिबल, सत्ताबल आदि सभी बलों से 'सत्यबल' ही बलवान होता है क्योंकि संसार में सत्य से रहित सबल से सत्य को धारण करने वाला व्यक्ति ही, भले ही वह बलरहित क्यों न हो, श्रेष्ठ माना जाता है, सत्यव्यवहार से युक्त व्यक्ति का कोई मुकाबला नहीं कर सकता। महात्मा गाँधी उस युग के ऐसे ही सत्यप्रेमी महामानव थे जिनके आगे इतनी बड़ी सबल अंग्रेजी सत्ता को भी झुकना पड़ा।

**भावार्थः** इह संसारे शक्ति-सत्ता-धनादिबलेषु सत्यम् एव श्रेष्ठं बलं मन्यते। सबलः अपि सत्यरहितः जनः सम्मानं न लभते अपितु सत्ययुक्तः बलहीनोऽपि सर्वत्र सम्मानं प्रतिष्ठां च लभते।

**श्लोकः 6**

> अत एव मया दत्तं नाम सत्याग्रहाश्रमः।
> सत्यानुयायियुक्ताया विनीतवसतेर्मम।।6।।

**अन्वयः** अत एव मया सत्य-अनुयायियुक्तायाः मम विनीतवसतेः 'सत्याग्रहाश्रमः' इति नाम दत्तम्।

**व्याख्या** साबरमती नदी के तट पर स्थित आश्रम में सज्जन लोग रहते थे, जो सत्यमार्ग का अनुसरण करने वाले थे। गाँधी जी कहते हैं कि उन सभी सज्जनों के सत्यव्यवहार व सद्आचरण को देखकर ही मैंने उस आश्रम का नाम 'सत्याग्रहाश्रम' रखा। जो हमें नित्य सत्यमार्ग पर चलने की प्रेरणा देता है। वास्तव में महात्मा गाँधी स्वयं सत्यव्रती थे। इसीलिए उनके अनुयायी भी सत्यव्यवहार से प्रेरित थे। महात्मा गाँधी 'पर उपदेश कुशल बहुतेरे' वाले व्यक्ति नहीं थे।

**भावार्थ** सबर्मत्याः तटे स्थितः यः आश्रमः अस्ति तस्मिन् सत्यव्यवहारे कुशलाः गाँधिनः अनुयायिनः अपि वसन्ति स्म। अतः महात्मा गाँधी तस्य आश्रमस्य नाम 'सत्याग्रहाश्रमः' इति कृतवान्।

**श्लोकः 7**

> इति सत्यादिधर्माणाममोघं बलमद्भुतम्।
> वर्णयन् ग्राहयामास व्रतानि सुबहून् गुरुः।।7।।

**अन्वयः** इति सत्यादिधर्माणाम् अमोघम् अद्भुतम् बलम् वर्णयन् गुरुः सुबहून् (जनान्) व्रतानि ग्राहयामास।

**व्याख्या** उस आश्रम का वर्णन करते हुए कवयित्री कहती है कि वहाँ गाँधी जी ने अपने अनुयायियों को सत्य, अहिंसा, अस्तेय, ब्रह्मचर्य, अपरिग्रह आदि के अद्भुत प्रभाव का वर्णन करते हुए उन सभी को उक्त नियमों को ग्रहण कराया। इस प्रकार सत्य अहिंसा ब्रह्मचर्यादि नियमों को धारण करने वालों से समाज में जागृति की एक नई लहर चल पड़ी।

**भावार्थः** एवं हि महात्मा गाँधी बहुभ्यः जनेभ्यः अहिंसा-सत्य-ब्रह्मचर्य-अस्तेय-अपरिग्रहादिधर्मान् उपादिशत्। सः तान्-नियमान् पालयितुम् अपि तान् अनुयायिनः प्रेरितवान्।

**श्लोकः 8**

आत्मवत्सर्वभूतानि पश्यतोऽस्य पदानुगाः।
गुणैः परवशीभूता व्यवर्धन्त सहस्रशः।।8।।

**अन्वयः** आत्मवत् सर्वभूतानि पश्यतः अस्य गुणैः परवशीभूताः पदानुगाः सहस्रशः व्यवर्धन्त।

**व्याख्या** कवयित्री कहती हैं कि इस प्रकार महात्मा गाँधी अपने सिद्धान्तों व विचारों का अनुसरण करने वाले सभी प्राणियों को आत्मीय भाव से देखते थे। धीरे-धीरे एक दूसरे से प्रेरित होते हुए वे अनुयायी हजारों की संख्या में नित्य प्रति बढ़ने लगे। महात्मा गाँधी के सद्गुणों का ऐसा अद्भुत प्रभाव था।

**भावार्थः** महात्मनः गाँधिनः अनुयायिनः कमपि भेदभावं विना सर्वान् जनान् आत्मवत् पश्यन्ति स्म। एवं हि महात्मनः उत्कृष्टैः गुणैः प्रभाविताः बहवो जनाः तस्य अनुयायिनः अभवन्। अर्थात् तेषां संख्या प्रतिदिनम् एव अवर्धत।

## व्याकरणबिन्दवः

### (क) सन्धिच्छेदाः

| | | |
|---|---|---|
| सत्यवानबलः | = | सत्यवान् + अबलः (संयोगः) |
| बलमद्भुतम् | = | बलम् + अद्भुतम् (संयोगः) |
| सत्यमेवातिरिच्यते | = | सत्यम् + एव + अतिरिच्यते (संयोगः, दीर्घसन्धिः) |
| सत्यानुयायियुक्तायाः | = | सत्य + अनुयायियुक्तायाः (दीर्घसन्धिः) |
| सत्यादिधर्माणाम् | = | सत्य + आदिधर्माणाम् (दीर्घसन्धिः) |
| व्यवर्धन्त | = | वि + अवर्धन्त (यण् सन्धिः) |
| सर्वबलेश्योऽपि | = | सर्वबलेभ्यः + अपि (विसर्गस्य उत्वम्, गुणः- अ + उ = ओ, पूर्वरूपम्) |
| विनीतवसतेर्मम | = | विनीतवसतेः + मम (विसर्गस्य 'र्') |

### (ख) विग्रहः समासः च

| | | |
|---|---|---|
| अमोघम् | = | न मोघम् (नञ्, तत्पुरुषः) |
| सत्यानुयायियुक्तायाः | = | सत्यस्य अनुयायिनः = सत्यानुयायिनः, तैः युक्तायाः (षष्ठी, तृतीयातत्पुरुषः) |



टिप्पणी

| | | | |
|---|---|---|---|
| सत्यवर्जितात् | = | सत्यात् वर्जितः तस्मात् | (पञ्चमीतत्पुरुषः) |
| पदानुगाः | = | पदानि अनुगच्छन्ति ये ते | (उपपद तत्पुरुषः) |
| सर्वबलेभ्यः | = | सर्वम् बलम् तेभ्यः | (कर्मधारयः) |
| विनीतवसतेः | = | विनीता वसतिः, तस्याः | (कर्मधारयः) |
| सर्वभूतानि | = | सर्वाणि भूतानि | (कर्मधारयः) |
| अबलः | = | नास्ति बलं यस्य सः | (बहुव्रीहिः) |

**(ग) पदपरिचयः**

| | | | |
|---|---|---|---|
| (i) | इति | = | अव्ययम् |
| | अस्य | = | इदम् (पुं.), षष्ठी, एकवचनम् |
| | मया | = | अस्मद्, तृतीया, एकवचनम् |
| | सबलात् | = | सबलशब्दः, (पुं.) पञ्चमी, एकवचनम् |
| | श्रेयान् | = | श्रेयस्, (पुं.) प्रथमा, एकवचनम् |
| (ii) | व्यवर्धन्त | = | वि उपसर्गः + वृध् धातुः, लङ्, प्रथमपुरुषः, बहुवचनम् |
| | अतिरिच्यते | = | अति उपसर्गः + रिच् धातुः लट्, प्रथमपुरुषः, एकवचनम् |

**(घ) प्रकृति-प्रत्यययोगः**

| | | |
|---|---|---|
| सत्यवान् | = | सत्य + मतुप्, (पुं.) प्रथमा, एकवचनम् |
| वर्णयन् | = | वर्ण् + शतृ (पुं.) प्रथमा, एकवचनम् |
| पश्यतः | = | दृश् = (पश्य) + शतृ (पुं.) षष्ठी, एकवचनम् |
| दत्तम् | = | दा + क्त (नपुं.) प्रथमा, एकवचनम् |

## पाठगतप्रश्नाः 20.2

1. **अधोलिखितप्रश्नान् संस्कृतेन उत्तरत।**

(क) सर्वबलेषु श्रेष्ठं बलं किम् अस्ति?

(ख) महात्मनः विनीतवसतेः नाम किम्?

(ग) आत्मवत् सर्वभूतानि कःपश्यति?

(घ) गुरुः सबहून् कानि ग्राहयामास?

**2. कोष्ठकात् उचितपदं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

(क) अबलः .................. श्रेयान् (सत्यवान्/सत्तावान्)

(ख) सत्यानुयायिभिः युक्ता .................. विनीतवसतिः। (मया/मम)

(ग) महात्मनः गुणैः .................. परवशीभूताः। (पदानुगाः/सुबहून्)

(घ) सत्यादिधर्माणाम् .................. बलम्। (सहस्रशः/अमोघम्)

**3. अधोलिखितपदेषु मूलशब्दः कः?**

श्रेयान्, सत्यम्, सुबहून्, गुणैः, महात्मा

**4. प्रकृतिप्रत्ययौ संयोज्य पदं रचयत।**

(क) वर्ण + शतृ पुं., प्र.वि., एकवचने ..................

(ख) सत्य+मतुप् पुं., प्र.वि., एकवचने ..................

(ग) दा धातुः + क्त, नपुं. प्र.वि. एकवचने ..................

**5. सन्धिं कृत्वा लिखत।**

(क) सर्वबलेभ्यः + अपि = ..................

(ख) पश्यतः + अस्य = ..................

(ग) वि + अवर्धन्त = ..................

## किमधिगतम्?

1. 'सत्याग्रहाश्रमः' महात्मना गाँधिना सबर्मत्याः नद्याः तटे स्थापितः।
2. महात्मना गाँधिना आंग्लशासकानाम् अन्यायविरोधे सत्याग्रहः कृतः।
3. आश्रमे अहिंसा-सत्य अस्तेय-ब्रह्मचर्यव्रतधारिणः अनुयायिनः अवसन्।
4. महात्मा गाँधी सत्य-अहिंसादिव्रतपालकः राष्ट्रस्य परमहितचिन्तकः चासीत्।

5. विसर्गसन्धौ विसर्गस्य स्थाने 'र', 'स्' 'उ' भवति, विसर्गस्य लोपः अपि भवति।

6. विसर्गस्य उत्वे, अ + उ = ओ, गुणे जाते यदि परवर्णः ह्रस्वः अकारः भवति, तहि पूर्वरूपसंधिः भवति। एवमेव एकारात् परम् चेत् ह्रस्वः अकारः, तदापि पूर्वरूपं भवति'

7. 'शतृ' प्रत्ययः, वर्तमानकाले, परस्मैपदधातुना योज्यते। शतृप्रत्ययान्तस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

## योग्यताविस्तारः

### (क) कवि परिचयः

प्रस्तुत पाठ पण्डिता क्षमाराव की कृति 'सत्याग्रहगीता' के चतुर्थ सर्ग से उद्धृत है। संस्कृत साहित्य की विदुषी पं. क्षमाराव का जन्म 1890 ई. में पूना (महाराष्ट्र) में हुआ था। पं. क्षमाराव ने सन् 1926 में साबरमती आश्रम जाकर महात्मा गाँधी जी का सान्निध्य प्राप्त किया। पं. क्षमाराव अत्यन्त क्रान्तिकारी महिला थीं किन्तु गाँधी जी ने उन्हें स्वतंत्रता संग्राम में कार्य करने की अनुमति नहीं दी। फिर भी उन्होंने स्वनिर्मित संस्कृत साहित्य के माध्यम से अपनी अभिरुचि उत्कृष्ट समाज व राष्ट्र सेवा के प्रति प्रदर्शित की। 1938 में उत्कृष्ट संस्कृत योगदान के लिए उन्हें 'पण्डिता' की उपाधि से विभूषित किया गया। संस्कृत साहित्य, समाज व राष्ट्र की सेवा करते हुए 1954 ई. में इनका निधन हो गया।

### कृति परिचयः

'सत्याग्रहगीता' पं. क्षमाराव की प्रथम कृति है जो 18 अध्यायों में विभक्त है। पं. क्षमाराव ने अनुष्टुप्, छन्द में गीता की अनुकृति पर गाँधी जी के सत्याग्रह आंदोलन को प्रस्तुत किया है। इस ग्रन्थ में 659 पद्यों में क्षमाराव ने गाँधी जी की अथक साधना का विवरण दिया है। इसके प्रथम सर्ग में गाँधी जी की स्थितप्रज्ञता का वर्णन किया गया है– वीतरागो जितक्रोधः सत्याहिंसाव्रती मुनिः। स्थितधीर्नित्यसत्त्वस्थो महात्मा सोऽभिधीयते।।119।। कवयित्री ने प्रस्तुत ग्रन्थ में गाँधी जी की सेवा तथा कर्त्तव्य परायणता का सुंदर वर्णन किया है। इसके अतिरिक्त इनकी अन्य रचनाएँ इस प्रकार हैं– 1. स्वराज्यविजय 2. मीरा लहरी (खण्ड काव्य) 3. तुकारामचरितम् तथा 4. श्री ज्ञानेश्वरचरितम् आदि तीन महाकाव्य हैं। इनके अतिरिक्त कथा व नाटक संबंधी कई अन्य रचनाएँ भी हैं।

### (ख) भावविस्तारः

प्रस्तुत पाठ में महात्मा गाँधी के निजी जीवन में धारण किये गए सत्य-अहिंसा आदि व्रतों व सामाजिक जीवन के प्रति जागृति व लोकहितभावना का वर्णन है। इन्हीं कल्याणकारी भावों से सम्बन्धित सूक्तियों व पद्यों को पढ़िये।

**सत्याग्रहाश्रमः**

(i) **सत्येन** रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।

मृजया रक्ष्यते रूपं कुलं **वृत्तेन रक्ष्यते**।। (विदुरनीति 21/39)

(ii) **सत्यमेवेश्वरो** लोके **सत्ये** धर्मः सदाश्रितः।

**सत्यमूलानि** सर्वाणि **सत्यान्नास्ति** परं पदम्। (महाभारतम्)

(iii) **सत्यमेव जयते** नानृतम्। (मुण्डकोपनिषद्)

(iv) **सर्वभूतहिते रतः** साधुरसाधुर्निर्दयः स्मृतः। (महाभारतम्)

(v) **धृतिः क्षमा** दमोऽ**स्तेयं शौचमिन्द्रियनिग्रहः।**

धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।। (मनुस्मृतिः)

(vi) **अहिंसा परमोधर्मः।**

(vii) मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।

**आत्मवत्सर्वभूतेषु** यः पश्यति स पण्डितः।। (पञ्चतन्त्रम्)

## (ग) भाषिकविस्तारः

### शतृप्रत्ययः

वर्तमानकाल के अर्थ में होने वाले दो मुख्य कृत् प्रत्यय हैं–शतृ और शानच्। 'शतृ' प्रत्यय परस्मैदी धातुओं से होता है जैसे– गम्, पठ्, आदि तथा शानच् 'प्रत्यय आत्मनेपदी धातुओं से जैसे सेव, लभ् आदि। किन्तु उभयपदी धातुओं (भज् पच्, कृ आदि) से दोनों प्रत्यय होते हैं।

- 'शतृ' प्रत्यय में 'अत्' शेष रहता है।
- 'शतृ' प्रत्ययान्त शब्द के रूप तीनों लिंगों में बनते हैं।
- शतृ प्रत्ययान्त पद का अर्थ' क्रिया को करता हुआ 'ऐसा अर्थ होता है।

  जैसे- पठ+शतृ = पठत् = पढ़ता हुआ।
- यह पद विशेषण के रूप में ही वाक्य में प्रयुक्त होता है।
- शतृ प्रत्ययान्त पद का प्रयोग मुख्य क्रिया से पहले की जानेवाली प्रायः गौण क्रिया के रूप में होता है। जैसे– बालः विद्यालयं गच्छन् वाटिकां पश्यति।

  (बालक विद्यालय जाते हुए वाटिका को देखता है।)

| *क्र.सं.* | *धातु + शतृ* | *मूलशब्द* | *अर्थ* |
|---|---|---|---|
| | गम् + शतृ | गच्छत् | जाते हुए |
| | दृश् + शतृ | पश्यत् | देखते हुए |
| | धाव् + शतृ | धावत् | दौड़ते हुए |
| | श्रु + शतृ | शृण्वत् | सुनते हुए |
| | लिख् + शतृ | लिखत् | लिखते हुए |

## शतृ प्रत्ययान्त शब्दों की तीनों लिङ्गों में रूपरचना

**प्रथमा विभक्तिः**

| | **पुल्लिङ्गे** | | | **स्त्रीलिंङ्गे** | | | **नपुंसकलिङ्गे** | | |
|---|---|---|---|---|---|---|---|---|---|
| | ए. व. | द्वि. व. | ब. व. | ए. व. | द्वि. व. | ब. व. | ए. व. | द्वि. व. | ब. व. |
| पठ+शतृ=पठत् | पठन् | पठन्तौ | पठन्तः | पठन्ती | पठन्त्यौ | पठन्त्यः | पठत् | पठती | पठन्ति |
| दृश्+शतृ=पश्यत् | पश्यन् | पश्यन्तौ | पश्यन्तः | पश्यन्ती | पश्यन्त्यौ | पश्यन्त्यः | पश्यत् | पश्यती | पश्यन्ति |
| धाव्+शतृ=धावत् | धावन् | धावन्तौ | धावन्तः | धावन्ती | धावन्त्यौ | धावन्त्यः | धावत् | धावती | धावन्ति |
| लिख्+शतृ=लिखत् | लिखन् | लिखन्तौ | लिखन्तः | लिखन्ती | लिखन्त्यौ | लिखन्त्यः | लिखत् | लिखती | लिखन्ति |
| वह्+शतृ=वहत् | वहन् | वहन्तौ | वहन्तः | वहन्ती | वहन्त्यौ | वहन्त्यः | वहत् | वहती | वहन्ति |
| गै+शत्=गायत् | गायन् | गायन्तौ | गायन्तः | गायन्ती | गायन्त्यौ | गायन्त्यः | गायत् | गायती | गायन्ति |

## रूप रचना

1. प्रस्तुत पाठ में सबर्मती, ध्यायन्, महात्मा, पितृ शब्दों का प्रयोग हुआ है। अतः यहाँ पर उन्हीं से सम्बन्धित या उनके सदृश कुछ शब्दों के रूप दिये गए हैं जिन्हें आप पढ़कर शब्दरूपों की योग्यता का विस्तार कर सकते हैं।

**नदी शब्द, ईकारान्त, स्त्रीलिङ्ग**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |
| द्वितीया | नदीम् | नद्यौ | नदीः |
| तृतीया | नद्या | नदीभ्याम् | नदीभिः |
| चतुर्थी | नद्यै | नदीभ्याम् | नदीभ्यः |
| पञ्चमी | नद्याः | नदीभ्याम् | नदीभ्यः |
| षष्ठी | नद्याः | नद्योः | नदीनाम् |

| | | | |
|---|---|---|---|
| सप्तमी | नद्याम् | नद्योः | नदीषु |
| सम्बोधन | हे नदि | हे नद्यौ | हे नद्यः |

विशेष– इसी तरह सबर्मती, मैत्रेयी, भारती, पृथ्वी आदि शब्दों के भी रूप बनेंगे।

**आत्मन् शब्द, हलन्त पुँल्लिङ्ग**

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | आत्मा | आत्मानौ | आत्मानः |
| द्वितीया | आत्मानम् | आत्मानौ | आत्मनः |
| तृतीया | आत्मना | आत्मभ्याम् | आत्मभिः |
| चतुर्थी | आत्मने | आत्मभ्याम् | आत्मभ्यः |
| पञ्चमी | आत्मनः | आत्मभ्याम् | आत्मभ्यः |
| षष्ठी | आत्मनः | आत्मभ्याम् | आत्मभ्यः |
| सप्तमी | आत्मनि | आत्मनोः | आत्मसु |
| सम्बोधन | हे आत्मन् | हे आत्मानौ | हे आत्मानः |

‘गच्छत्’ (पुल्लिँङ्ग) (गम् + शतृ)

| | | | |
|---|---|---|---|
| प्रथमा | गच्छन् | गच्छन्तौ | गच्छन्तः |
| द्वितीया | गच्छन्तम् | गच्छन्तौ | गच्छतः |
| तृतीया | गच्छता | गच्छद्भ्याम् | गच्छदिभः |
| चतुर्थी | गच्छते | गच्छद्भ्याम् | गच्छद्भ्यः |
| पञ्चमी | गच्छतः | गच्छद्भ्याम् | गच्छद्भ्यः |
| षष्ठी | गच्छतः | गच्छतोः | गच्छताम् |
| सप्तमी | गच्छति | गच्छतोः | गच्छत्सु |
| सम्बोधन | हे गच्छन्! | हे गच्छन्तौ! | हे गच्छन्तः |

‘गच्छत्’ (स्त्रीलिङ्ग)

| | | | |
|---|---|---|---|
| प्रथमा | गच्छन्ती | गच्छन्त्यौ | गच्छन्त्यः |
| द्वितीया | गच्छन्तीम् | गच्छन्त्यौ | गच्छन्तीः |
| तृतीया | गच्छन्त्या | गच्छन्तीभ्याम् | गच्छन्तीभिः |

(सभी रूप नदी की तरह)

'गच्छत्' (नपुंसकलिङ्ग)

| | | | |
|---|---|---|---|
| प्रथमा | गच्छत् | गच्छती | गच्छन्ति |
| द्वितीया | गच्छत् | गच्छती/गच्छन्ती | गच्छन्ति |

**शेष पुंल्लिङ्ग की तरह**

'पितृ' (ऋकारान्त पुंल्लिङ्ग)

| | | | |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधन | हे पितः | हे पितरौ | हे पितरः |

## पाठान्तप्रश्नाः

1. **अधोलिखितप्रश्नान् संस्कृतेन उत्तरत।**

(क) सत्याग्रहाश्रमः कुत्र स्थितः अस्ति?

(ख) सुकलत्रः कः आसीत्?

(ग) तस्मिन् पुण्यनिवासे किं प्रमाणम् आसीत्?

(घ) सत्यमेव केभ्यः अतिरिच्यते?

(ङ) 'सत्याग्रहाश्रमः' इति नाम केन दत्तम्?

(च) महात्मा गाँधी केषां हितैकपरायणः अभवत्?

(छ) सत्यादिधर्माणाम् बलं कीदृशं भवति?

(ल) महात्मनः गाँधिनः गुणैः वशीभूताः के व्यवर्धन्त?

2. सत्याग्रहाश्रमस्य वर्णनं पञ्चवाक्येषु कुरुत।

3. महात्मनः गाँधिनः चारित्रिकं वैशिष्ट्यं पाठम् आधृत्य पञ्चवाक्येषु लिखत।

4. अष्टमश्लोकस्य प्रदत्त-अन्वये रिक्तस्थानपूर्तिं कुरुत।

**अन्वयः**- आत्मवत् सर्वभूतानि (i) ..................... अस्य (ii) ..................... परवशीभूताः (iii) ..................... सहस्रशः (iv) .....................।

5. भावार्थं स्पष्टयत।

(क) वर्णयन् ग्राहयामास व्रतानि सुबहून् गुरुः।

(ख) सत्यवानबलः श्रेयान् सबलात् सत्यवर्जितात्।

(ग) विराजते मुनिर्बुद्धो बोधिद्रुमतले यथा।

6. अधोलिखितेषु पदेषु कः प्रत्ययः?

(i) ध्यायन्, (ii) सत्यवान्, (iii) वर्णयन् (iv) आश्रमवासिनाम्।

7. अधोलिखितपदेषु संधिं कुरुत।

(क) ततः + तीरे = ............................

(ख) मित + आशी = ............................

(ग) तत् + हितम् = ............................

(घ) पश्यतः + अस्य= ............................

(ङ) पिता + इव = ............................

8. अधोलिखितविग्रहम् अधिकृत्य समस्तपदानि रचयत।

(क) न मोघम् = ............................

(ख) सुस्मितम् आननं यस्य सः = ............................

(ग) महान् आत्मा यस्य सः = ............................

(घ) शोभनम् कलत्रम् यस्य सः = ............................

(ङ) पदानि अनुगच्छन्ति ये ते = ............................

9. अस्मात् पाठात् अव्ययपदानि चित्वा लिखत

10. विशेषण-विशेष्यदृष्ट्या किं पदयुगलं शुद्धम् (√) किंच अशुद्धम् (X)?

(क) ध्यायन् क्लेशान्

(ख) सत्यवान् अबलः

(ग) दत्तम् नाम

(घ) सुबहून् गुरुः

(ङ) बलम् अद्भुतम्

(च) सर्वाणि भूतानि

## उत्तराणि

**बोधप्रश्नाः**

1. (क) स्थापयामास (ख) मुनिर्बुद्धो
   (ग) श्रेयान् (घ) व्यवर्धन्त

2. (क) आश्रमः (ख) मम (ग) सर्वभूतानि
   (घ) श्रेयान् (ङ) आश्रमवासिनाम्

3. (क) घर को (ख) मोहरहित (ग) अल्पभोजी
   (घ) कभी नष्ट न होने वाले (ङ) बढ़ गए

**पाठगतप्रश्नाः 20.1**

1. (क) सबर्मत्याः (ख) आश्रमः (ग) महात्मा गाँधी
   (घ) बोधिद्रुमतले

2. (क) पुण्यनिवासे (ख) आश्रमः
   (ग) महात्मा (घ) मुनिः

3. (क) महात्मा (ख) शिशुप्रेमी (ग) सुकलत्रः
   (घ) सत्याग्रहाश्रमः

4. (क) (√) (ख) X (ग) (√)
   (घ) X

टिप्पणी

**पाठगतप्रश्नाः 20.2**

1. (क) सत्यम् (ख) सत्याग्रहाश्रमः (ग) महात्मा गाँधी
   (घ) व्रतानि
2. (क) सत्यवान् (ख) मम (ग) पदानुगाः
   (घ) अमोघम्
3. श्रेयस्→श्रेयान्, सत्य→सत्यम्, सुबहु→सुबहून्, गुण→गुणैः, महात्मन्→महात्मा
4. (क) वर्णयन् (ख) सत्यवान् (ग) दत्तम्
5. (क) सर्वबलेभ्योऽपि (ख) पश्यतोऽस्य (ग) व्यवर्धन्त

**पाठान्तप्रश्नाः**

1. (क) सबर्मत्याः नद्याः तटे (ख) महात्मा गाँधी (ग) सत्यम्
   (घ) सर्वबलेभ्यः (ङ) महात्मना (च) स्वबन्धूनाम्
   (छ) अमोघम् अद्‌भुतम् च (ज) पदानुगाः
2. छात्राः पाठं आधृत्य स्वेच्छया पञ्च वाक्यानि लेखिष्यन्ति।
3. छात्राः स्वेच्छया महात्मनः वैशिष्ट्यम् पञ्चवाक्येषु लेखिष्यन्ति।
4. अन्वयपूर्तिः (i) पश्यतः (ii) गुणैः (iii) पदानुगाः (iv) व्यवर्धन्त
5. भावार्थः

   (क) महात्मा गाँधी असंख्यान् जनान् सत्य-अहिंसाब्रह्मचर्यादीनि व्रतानि ग्राहयामास।

   (ख) बलहीनः अपि सत्ययुक्तः जनः प्रशंसनीयः भवति, न तु सः सबलः यः सत्यरहितः।

   (ग) महात्मा गाँधी आश्रमे सदा लोकहितं चिन्तयन् बोधिवृक्षस्य

   अधः ध्यानमग्नः बुद्धः इव राजते स्म।

   **अथवा तत्भावसदृशम् अन्यत् किमपि वाक्यम्।**
6. (i) शतृ (ii) मतुप् (iii) शतृ (iv) इनि

7. (क) ततस्तीरे (ख) मिताशी (ग) तद्धितम्
   (घ) पश्यतोऽस्य (ङ) पितेव

8. (क) अमोघम् (ख) सुस्मिताननः (ग) महात्मा
   (घ) सुकलत्रः (ङ) पदानुगाः

9. अव्ययपदानि– ततः, एव, हि, इव, यथा, अपि, अतः, नाम, इति, आत्मवत्।

10. विशेषण-विशेष्ययुगलम्
    (क) (X) (ख) (√) (ग) (√)
    (घ) (X) (ङ) (√) (च) (√)